Title of Mss.: Srisrimahadev
Language Sans - Mahadev
No. of Folios : 12
Materials : v.p
Conservation : Preventive/Curative
Performed by KKHL, MCC: GU
National Mission for manuscripts,
New Delhi,
Date
29.10.06 65.

শ্রীশ্রী মহাদেব ও মহাদেবী
উপাখ্যান খণ্ড

ভাষা সংস্কৃত / ১২ পত্রে ২২ পাতা /
১ পাতা-দেবনাগরী লিপি / ক্ষেত্র ৩০ সেমি x ১০.১ সেমি
অসম্পূর্ণ।

শ্রীশ্রী ৺মহাদেব ও ৺মহাদেবী

উপাখ্যানখণ্ডে ॥

ঋষি-তন্ত্র ॥

শ্রীশ্রী৺ দোল গোবিন্দায় নমঃ ॥ ॥ ॥ পার্ব্বত্যুবাচ ॥ দেব দেব মহাদেব সর্ব্বাগম
বিশারদ। অধুনা ব্রূহি মে নাথ প্রাণী শান্তি সুখাবহ ॥ স্বল্পায়ু স্বল্প বুদ্ধি স্যাৎ স্বল্পা
ক্রম কলৌ যুগে। কিং কৃতে সর্ব্ব প্রাণীনাং মুচ্যতে ভব শঙ্কটাৎ ॥ কিমুপায়েন গোবিন্দ
১। ধর্ম্মার্জ্জিতং করোতি বৈ। কিম্বা ধর্ম্ম নিরূপ্যন্তে প্রাণীনাং হীত কারকঃ ॥
মহাদেবোবাচ ॥ শৃণু দেবি প্রবক্ষ্যামী যৎ পৃচ্ছসি তয়াধুনা। যস্য বিজ্ঞান মাত্রেণ
লোকানাং শান্তি বর্দ্ধতে ॥ কৃতে যজ্ঞাদি কর্ম্মাণি ত্রেতায়ে ধ্যান তৎপরা। দ্বাপরে
তপসার্ব্বঃ কলৌ দান স্থিবিয়তে ॥ সর্ব্বান্ বৈ নিবৃতি যাতা বর্ত্তমানে কলৌযুগে।

নশ্যেৎ ধর্ম্ম মাদৃত্য নচদানং পরস্থলং ॥ রজং রত্নং তথা স্বর্ণং দানস্থে মানসে কৃতে ।
নচ চান্যেন পাত্রেন ক্রিয়তে গুরু সন্নিধৌ ॥ তবাদ্প্রকরণাৎ দানাৎ যস্তু কামে
প্রবর্ত্ততে । গুরুপাদে সদা কৃত্বা নান্য পাত্রে বিধিয়তে ॥ অন্যথাচরনাদ্দোবি নিষ্ফলং
তানি জায়তে । বন্ধ্যা সেবি চ লোকানাং ফলাভাব যথা হিহ ॥ দ্বেভাগো বিদ্যতে
ব্রহ্ম পূর্ব্বৈব কথিতং ময়া । অস্তু ব্রহ্মঃ বাহ্য গুরু স্তত্রৈব স্থিয়তাং ভবি ॥ বিহরেদ্গু
রু রূপেন সংসারে ধর্ম্ম দর্শনে । ধর্ম্মহীন ভজজ্ঞানাং গুরুপাদে সমাশৃতং ॥
লোকানাকর্ষনং কৃত্বা পশ্যান্তি স্বস্ব মার্গবিৎ । যস্য গ্রহণে মাত্রেন ব্রহ্মজ্ঞানং

লভেন্নরঃ ॥ তেনৈব ব্রহ্মবিৎ জ্ঞাত্বা যানি লোকে ভজন্তি হি। সর্ব্বকার্য্যেপি শুশ্রূষ্য
সদ্যঃ মুক্তি প্রজায়তে ॥ ॥ পার্ব্বত্যুবাচ ॥ উচ্চাণিচ্চ কথং দৃশ্যা সর্ব্বেন্দ্রিয়
সমানতা। ধনী গুনী দরিদ্রাদি ভেদাতি ভরী বিদ্যতে ॥ বদ শ্ব বিস্তরাদ্দেব তব মুখাৎ
২। শ্রুতং ময়া। তারদপ্রকরণশ্রুত্বাহি হর্ষ চিত্তে মমাগ্রতঃ ॥ শ্রীরুদ্রোবাচ ॥ ॥ গোপনীয়ং
গোপনীয়ং যদ্যপৃচ্ছসি তয়াবুনা। তবাগ্রে কথিতং দেবি মা প্রকাশ্য যথা তথা ॥ ধর্ম্মা
ক্রমোস্তি লোকানাং এভিঃ ঘোর কলৌ যুগে। যজ্ঞহোমো ব্রতঞ্চৈব শক্যতে ন কর্ত্তুন।
কলৌ অন্নগতৌ প্রাণী ব্রতকষ্টে পরাঙ্মুখঃ। তস্মাদুপায়ো যদ্দাস্তি পূর্ব্বৈব ভাষিতং ময়া ॥

গুরু ব্রহ্মা গুরু বিষ্ণু গুরুর্হর পরম দেবতা। তস্য শুশ্রুষণে দেবি প্রাণিনাং শান্তি মুক্তয়ে ।।
সর্ব্বযজ্ঞং ফলং প্রাপ্তুং শুদ্ধ চিত্তেন সেবনে। তীর্থানি কর্ণাভাবে গুরুসঙ্গে বসন্তি হি ।।
যে পূর্ব্বং স্তুতির্থ সমাপ্তি প্রাণ সঙ্কীর্ত্তনং, ঐক্যং শৈবং হুতা হুতাসন মুখ্যং কৈবল্য
মুক্তিক্রমং। গোদত্তং কনকং নচান্যং মোদকং গাবো স্তিলা মেদিনী, তে ভাস্য ন্নবুনা
কৃচ্ছ্রেন ব্রকুলা নিত্যং নরা দুঃখিনং ।। গোদত্তং রত্ন সায়ুষ্যং গো বজ্রং [illegible]
সুবর্ণষ্ণু। নযানং নচ দ্রব্যানি গুরুন্নামে পরাঙ্মুখঃ ।। নচদান ব্রত বৈষ্ণব নহোমো
যজ্ঞতৎপরাঃ। সর্ব্বান্ বিম্মান্ ভবনা বিদীতান বিদ্যতে গুরুসান্নিধৌ ।। গুর্ব্বাগ্রাহী

ভবেৎ শিষ্যঃ সর্ব্বদা ভক্তি যোগতঃ। বন্ধায়ু বন্ধুবিত্তৈশ্চ স্যাৎ স্থুলাদেহেন ন সংশয়ঃ॥
অন্যথা নারকী জ্ঞেয়া শবতুল্যশ্চ দেহজঃ॥ কায়বাক্য মনো নিত্যং শুশ্রূষ্য গুরুপাদয়োঃ
কপাটে শুশ্রূষণে স্থলে অগ্রে ভয়াদ্বা অর্থ নানসে। নতু র্ব্বামেন নিপ্যান্তি গুর্ব্বাদিভিঃ
৬। লভেন্নরঃ॥ নানা বাদ্য সমাগৃহ্য বাকবৌলেন তৎপরা। গুর্ব্বাগমন কালেন
মহাকোলে সমাদৃতঃ॥ বাহয়েৎ যান সংস্থান্যা দুঃখ্যো শান্তি ন সংশয়ঃ।
শুশ্রুমালেচ সদা রক্ষেৎ সুভক্ষানে দিনে দিনে॥ নগরে প্রান্তরে গ্রামে গ্রামায়িষ্বা
শ্চ যত্নতঃ॥ সর্ব্ব বিঘ্নঃ প্রশান্তি স্যাৎ সর্ব্ব দোষ নিবর্হণং॥ যথা ক্রমেবহেৎ

সার্দ্ধং সুধা রূপে প্রপূজনে। যং যং ভাবে বহেত্তেষাং কর্ম্ম সিদ্ধির্নবাধিতে।
অপুত্রো লভতে পুত্রং ধনার্থী লভতে ধনং। বিদ্যার্থী লভতে বিদ্যাং মুক্ত্যার্থী
মুক্তি মাপ্নুয়াৎ ॥ অকাল মৃত্যু হরণং সর্ব্ব ব্যাধি বিনাশনং। গুরু পাদোদকং
পিত্বা শিৰসা ধৰণে কাচিৎ ॥ ভাৰাদী বাহুয়েৎ শিষ্যান সর্ব্ব শান্তিচ মানসা।
সদ্যঃ মুক্তি প্রদাতব্যং শিবোক্ত বচনং যথা ॥ শিষ্যায় পৰশিষ্যায় সাধিকায়
মাহেশ্বৰী। নস্তুৎ চান্য ভাবেন লিপ্যতে গুরু সান্নিধৌ ॥ দাভ্যা [illegible]ভাবো ভবেদেকং
সদাশুৎ স্নেহ তৎপৰা। অন্যথা ভক্তিহানিস্যাৎ সত্যমেতদ্ধূবং প্রিয়ে ॥

পাপপুণ্যং প্রদৃষ্টানাং গুর্ব্বাগ্রে প্রব্রজেৎ কিল। ইহৈব মুক্তিমার্গোস্তি অন্যথা
নিরয়গামিনঃ ॥ অত্যুগ্রং পাপপুণ্যস্য ইহৈব ফলমুচ্যতে। তত্ত্বং
নাহংসি দেবেশি গুরুদৈবাৎ প্রপীড়িতে ॥ পাপপ্রশমনং কৃত্বা সর্ব্বদা
৪। শুভ নিবর্ত্তকে। ধর্ম্মৈবপরভাবেন ভক্তিহানী নসংশয় ॥ ধনধান্যাদি
পীড়াদ্যা কৃয়তে গুরু কার্য্যতঃ। শাস্য ভাবোস্তি শিষ্যস্য সমগ্রং গুরুপাদে
কৃতে ॥ সর্ব্বান্ বিত্তাতি যদলব্ধং গুরুবগ্রে নিবেদিতে। তবেদপ্রশমনং যাতি
গুর্ব্বার্থে পিচ পিড়নং ॥ কৃতে বেদোক্ত কর্ম্মানি স্রেতায়ে স্মৃতিসম্মতং।

দ্বাপরে চ পুরাণানি কলাবাগম সম্ভবাঃ ॥ কৃতোক্ত গুরু সন্ন্যাসং বৈরাগ্যং
দ্বাপরে ইহ। উদাসী চ ত্রেতায়াঙ্কু কলৌ গৃহি প্রশস্যতে ॥ স্বস্ব মার্গৈর্ব্বশ্রুতান্
শিষ্যান্ সর্ব্ব সিদ্ধিঃ ন সংশয়। অজয়া অভয়া ধর্ম্মো বিদ্যতে গুরু সন্নিধৌ ॥
বিপর্য্যয়োপি যঃ কুর্য্যাৎ জ্ঞানাজ্ঞানে বিচক্ষণঃ। উভয়ো নিরয়গামিস্যাৎ
যাবচ্চন্দ্র দিবাকরৌ ॥ গুরুরগ্নি দ্বিজাতিনাং বর্ণানাং ব্রাহ্মণো গুরু। পতিরেকো গুরু
স্ত্রীনাং সর্ব্বাত্রা অভ্যাগতো গুরু ॥ গুর্ব্বাপ্রহারিতান্ শিষ্যান্ দৈবাৎ কর্ম্মেপি
দারুণৈঃ। ন চ চান্যেন ভাবেপি কর্ত্তব্যো শিষ্য বর্গয়ো ॥ মনঃ বিকল মাশ্রিষণ গুরু

শিষ্য পিতা সুতঃ। শিষ্য সুতস্ত দুঃখাৰ্ত্তা ক্রিয়তে গুরু দেবতা ॥ দ্বাভ্যামপি চ মিথ্যু
ক্তিস্যাৎ ততঃ মুক্তিচ শিষ্যয়ো। আহিতা চৰণাদ্দেবি বিষ্ঠায়াং যায়তে কৃমি ॥
গুৰ্ব্বাদ্দৈ লভতে বিত্তং যথা ভৃত্যো পালক্ষয়ে। উভয়ো নিৰয়গামিস্যাৎ দাতা
৩। গ্রাহী নিৰন্তৰে ॥ বহবঃ গুৰব সন্তি শিষ্য বিত্তাপহাৰকঃ। দুর্লভোয়ং গুরু
দেবি শিষ্য সন্তাপ হাৰকঃ ॥ গুৰ্ব্বাজ্ঞাং দ্যুতে শিষ্যাণ তস্যাচাৰোশ্চ বৰ্জয়ে।
অন্যথা পাতকি সোপি সত্যমেতদ্ব্রবণ প্রিয়ে ॥ পুত্র ভার্য্যা সমো স্নেহং স্থুণা
ব্যাঘ্র সমো ভয়ং। মাত ৰাজা সমো আজ্ঞা ক্রিয়তে গুরুৰাগ্রতঃ ॥

গুৰ্ব্বান্নং দেবদত্ত্বান্নং মাবিচার্য্য কথঞ্চন। শ্ব বদোপি স্পৃশেদ্দেবাং নতু বর্জ্জং কৃতে
প্রিয়ে॥ ক্রোধাদ্বা যদি বা মোহাদ্ভয়াদ্বাজ্ঞানতোপি বা। গুরুত্যাগং কৃতে কোটিদ্বক্তা
চ নিৰয়গামিনঃ॥ মন্ত্র ত্যাগে ভবেন্মৃত্যু গুরুত্যাগে দৰিদ্রতা। প্রতিমাসু বাতু
বুদ্ধি ৰৌৰবং নৰকং ব্রজেৎ॥ মন্ত্রে চাক্ষৰ ভাবেন পূৰ্বে ভাবে গুরু রূপে। তাবদ্ধিকল্পি
শ বৃদ্ধিস্যাৎ শিবোক্ত বচনং যথা॥ শ্রেষ্ঠাদিস ঃসমো নাস্তি গুৰ্ব্বাগ্রে দেব মন্দিৰে।
মানামান ন বিদ্যেত গুরু পিতা মুতাগ্রতঃ॥ গকাৰ সিদ্ধিদঃ প্রোক্তঃ ৰেফ
পাপস্য দাহক। উকাৰ সৰ্ব্ব দেবানাং ব্যাপ্তা গুরু স উচ্যতে॥ গুকাৰ পাপদাহাৰ্থং

রুকার শান্তিকারকঃ। দ্বিবর্ণার্থৈর্দেব তুল্যং গুরুর্নামেতি লক্ষিতং॥ বেদবেদাঙ্গ
তত্ত্বজ্ঞো জপহোমপরায়নঃ। আশির্ব্বাদপরো নিত্যং স এব গুরুরুচ্যতে॥ সকার শব
রূপিচ তকার ত্রাণ হেতুক। ৱকার রক্ষকং মুর্ত্তি তস্মাৎ সত্র শ্চ উচ্যতে॥ শব রূপানি প্রানিনাং
৬। ত্রায়তে যত্র যজ্ঞতঃ। সত্র সংজ্ঞা চ বিজ্ঞেয়ঃ সাবিকারী বিধী স্মৃতঃ॥ যজ্ঞস্তুতাদি কার্য্যানি
মুক্তিমার্গস্য কর্ম্মসু। সর্ব্বানবৈ ক্রিয়তে যত্র স স্থানং সত্র উচ্যতে॥ শকার শুদ্ধ চিত্তস্য
ইকার গুরু বন্দনে। ষকার সেবনে ইজ্যং যকার জপ হেতবঃ॥ গুর্ব্বার্থে চ মনোদ্বেগঃ
কায় বাক্যে চ নিত্যসঃ। তস্মাৎ শিষ্যস্ত সংজ্ঞা চ তন্ত্রোক্ত তানি ভাষতে॥ আবশ্রামে

বহেদ্ভারং গুরু ন্নামেপি ভূচুরাঃ। গুরুধামে সদা বাঞ্ছা ভার্য্যা পুত্রশ্চ লালসা ।
জিতেন্দ্রিয়ো জীতো ক্রোধঃ গুরু দৈবাজ্ঞাপিড়ীতে । তস্মাৎ সর্ব্ব প্রযত্নেন গুরুগ্রাহী ভবেন্নরাঃ ।
প্রাণৈর্ধনৈ গুরুং রক্ষেৎ সজ্জনঃ ধর্ম্মশীলজঃ। অন্যথা পাতকী জ্ঞেয়া শিবোক্ত বচনং যথা ।
গুর্ব্বার্থে পিচ কর্ম্মাণি সাধয়েদ্বা বিযত্নতঃ। দোষাদোষ নাবদেত শাস্ত্রাদি করণেরপি ।
পার্ব্বত্যুবাচ ।। কিমুপায়েন শিষ্যানাং সর্ব্বগ্রহ নিবারণং । দৈবাজ্ঞাপিড়ীতে তেষাং শান্তি
স্তুত্র বদস্ব মে । শ্রীরুদ্রোবাচ । শরণং গুরু পাদেন গ্রহশান্তি নিমিত্তক। শক্ত্যানুসারেণ
পুজ্য গুরু তুষ্টৈচ মুক্তয়ে । শিবে রুষ্টে গুরুস্ত্রাতা গুরু রুষ্টে নকশ্চন। তস্মাদ্দৈ সর্ব্বদেবানাং ।

গুরুর্হি গ্রহরাজশ্চ । মুক্তকর্ম্মাশ্চ শিষ্যানাং গুরু তুষ্টেচ রক্ষণং । তস্মাদ্দ্রুয়াদি নিবৃত্তঃ
চৌষষ্টি রোগমাপদে । গুরু কষ্টং নদাতব্যং নদাতব্যং নসংশয় । অন্যথা পাতকি জ্ঞেয়া
নারাগি বিপদাশ্রয়ে । লাক্ষি কষ্ট ভবন্তি চ সর্ব্বদা ক্রোধ সংবৃতঃ । দারীদ্র মাশ্র
৭। য়েৎ সদ্যঃ বিহরেদ্ভব বন্ধনে । সর্ব্বগ্রহাদি পিড়াদ্যা মাভয়ং দুঃখ বর্জ্জিতং । তাবদ্বি
নিবৃত্তি লব্ধা ভুত প্রেত পিশাচকাঃ । পার্ব্বত্যুবাচ । গুরু শিষ্যস্ত যদগুপ্তং শ্বশাং তব
মুখাৎ শ্রুতং । জিজ্ঞাস্যমেক সন্দেহো কথয়শ্চ কৃপানিধে । বসন্তাদি মহারোগে
কিমুপায়ে তরান্তিহি । অন্যথা মৃত্যু বৃদ্ধিস্যাদ্বিষ্ণু রাদ্বদ যজ্ঞতাং । শ্রীরুদ্রোবাচ ।

শিতলাং ঘোর চাবান্নি নানারূপে ভ্রমন্তিহি। ত্রিভিঃ প্রকারৈ সা দেবী নৃদেহে পিড়য়েৎ সদা॥
সাংঘাটিকশ্চ সাধ্যোস্তি প্রাকৃত নাম সংজ্ঞকং। তস্মাদুপায় যদাস্তি পূর্ব্বৈব কথিতং ময়া॥
লক্ষণং শৃণু দেবেশি তবাগ্রে কথিতং ময়া। গুটিকাং কৃষ্ণবর্ণেন মেঘাচ্ছাদিত সদৃশঃ॥
সাংঘাটিকমিতি জ্ঞেয়া অসাধ্যব্রণ লক্ষিতং। মন্দে মন্দে চ নির্গত্য সাধ্যোহি দেহ পীড়নে॥
রক্তবর্ণ সমাদৃষ্টা ধন্য সংখ্যাচ নির্গতিঃ। প্রাকৃতা শীতলা দেবী দৈব কর্ম্ম প্রপূজনে॥
গুরুশ্চ বোধয়েৎ শিষ্যান্ ব্রণাদিকৃত কর্ম্মষু। শীতলং যান্তি সা দেবী যস্য দেহে চ চিহ্নহি।
শুচিকৃত ধূনান চিহ্নং কর্ত্তব্যো সর্ব্ব জাতয়ো। বরাহ বেদ বীজেন নবে চ ত্রিভিঃ দর্শিতং॥

ব্রহ্মক্ষেত্রাৎ সমুৎপন্নং বিজেন সর্ব্বতোত্তমং । ~~ম~~মন্ত্রেদ্বীজেন কর্ম্ম শান্তিমিহ কারয়েৎ ॥
তস্মাদ্বিজেন কর্ত্তব্যা ~~ক্ষ~~তানি বালপুংস্ত্রিয়োঃ । বসন্তাদি নিবৃত্তিস্যাৎ পীড়াদ্যা নাস্তি
ভূতলে ॥ শূচিক্ষতং করে যস্য মাকৃতে দৈব বর্ষেপি । অশুদ্ধং সম্ভবং দেহে শীতলা
৮। ক্রোধঃ সম্ভবে ॥ ষোড়শাদ্দ নামানি গীতানি তানি ভাষতে । সর্ব্ব প্রযত্নেন পূজ্যা স্তুতিভি
র্দিনে ব্যাপোহতি ॥ শীতলং যান্তি কর্ম্মাণি ব্রণ ক্ষতেন মুক্তয়ে । শুচিরাগ্রে সমুদ্ধৃত্য
লিপ্ত বীজং সুরক্ষিতং ॥ বৈদ্যাদ্বৈ সাধয়েৎ যজ্ঞং গুরুর্য়েচ নিবেদীতং । সমগ্রং গুরুরে কর্ত্তা
মুক্তি শান্তি নশং সয়ঃ ॥ এবম্বৈ বোধয়েৎ শিষ্যান্ গুরু হুত্বা বিধি স্মৃতঃ । ওঁষধ্রি জাহ্নবি

তোযং বৈদ্যনারায়ণো মতঃ। তয়া যদ্ পৃশ্যতাং দেবী সমগ্রং কথিতং ময়া। দুর্লভোয়ং গুরুর্দেবি
শিষ্যস্তু মুক্তি হেতবঃ। সর্ব্বান্বৈ নিবৃত্তিলব্ধা মাভযং ক্ষিতি মণ্ডলে। এবাগ্রেণ সুপুজশ্চ
কায় বাক্যে বর্ণাদিষু॥ যইদং শৃণুয়াৎ নিত্যং পঠেদ্বা পাঠয়েদ্ বগুঃ। ধন ধান্যং প্রদেদ্দেব
পুত্রপৌত্র সমন্বিতঃ। দিবা বা যদি বা রাত্রৌ পঠেদ্বা গ্রহ পীড়নে। পক্ষান্তোহং বিমুক্তস্যাৎ
সত্যমেতদ্ধ্রুবং প্রিয়ে। শ্রীদেব্যুবাচ। চণ্ডালাদি জাতয়ো দৃষ্টা ব্রহ্মক্ষেত্র শঙ্কর বৈশ্যাদি
শূদ্রবর্ণানাং বিদ্যতে ভব মণ্ডলে। বদস্ব বিস্তরাদ্দেব গুরু যুক্তং কেন জাতয়ো। যস্মাদ্বৈ
সর্ব্ব প্রাণীনাং ভব মুক্তো হিলভ্যতে। মহাদেবোবাচ। শৃণু প্রিয়ে মহামন্ত্রে যৎ পৃচ্ছসি

তয়াধুনা । যস্য শ্রবণমাত্রেন সন্দেহো তব মুচ্যতে ॥ গুরুরগ্নি দ্বিজাতিনাং বর্ণানাং ব্রাহ্মণো
গুরু । চতুর্বিধা ব্রাহ্মণানাং তস্য মধ্যে প্রভেদতঃ ॥ প্রশংসো সাগ্নিকজ্ঞেয়া নিরগ্নি নাড়িক্ষো
স্মৃতঃ । প্রাক্ দ্বয়ো চোত্তমা বিপ্রাঃ গুরু যুক্তোহি নিত্যশঃ ॥ নিরগ্নি নাড়িক্ষো বিপ্র দেবালয়ে
৯। চ যাজনে । এভি প্রকরণৈ ইত্যং গুরু যুক্তং নকথ্যতে ॥ আশজীবি মশী জিবী দেবলো গ্রাম্য যাজক ।
পাচকঃ শূদ্রসেবী চ ষড়েতে ব্রাহ্মণোধমঃ ॥ গুরু তস্য গ্রহণেন মুখ্য প্রাপ্তি ন লভ্যতে । চোত্তমা
ভাবেহি প্রাণিনাং গ্রহণে নাত্র দোষয়ো ॥ জন্মনা শূদ্রবৎ জ্ঞেয়া সংস্কারাদ্বিজ উচ্যতে । বেদা
ভ্যাসেভবেদ্বিপ্র ব্রহ্মং জানাতি হি ব্রাহ্মণেঃ ॥ গৃহস্থো দেশীকো বিপ্রো গুরুপদে প্রযুজ্যতে ॥

ধর্ম্মঅর্থকামমোক্ষং চতুর্ব্বর্গশ্চ সিদ্ধয়ে ॥ ক্ষেত্রিবৈশ্য সুথা শূদ্রো আচার্য্যে তন্নমন্যতে
বিপ্রাভাবে ক্ষেত্রিয়োপি গ্রহনে নাস্তি দোষয়ো ॥ শাস্ত্রজ্ঞং বাগ্মিকং বৈশ্য শূদ্রো গুরু
নাশোভনং । তস্মাৎ সর্ব্ব প্রজত্নেন সর্ব্বতে তৎ বিবর্জ্জয়ে ॥ শূদ্রস্তু ধর্ম্ম বক্তার
রাজ্যে চ পরদেশীয় । তত্র বাসে মহৎ ক্লেশং বিদুষাং মুর্খতাং ভবেৎ ॥ বেদাবিক্ষেত্যাহি
বিপ্রানীং বেদমার্গ প্রবর্ত্তকঃ । নান্য জাতো বিনা বোস্তি সত্যং তে কথিতং প্রিয়ে ॥
মহাদেব্যুবাচ ॥ শরন কিং প্রকারেন দীয়তে গুরুপদে প্রভো । মমাগ্রে কথয় নাথ
যস্মাত্তরান্তি শিষ্যয়ো ॥ কিম্বা শরন মুদীশ্য বিস্তুবাদ্বদ্ গোচরে । কাতীর্ব্বিবা ভবেত্তেব

সন্দেহো মম সুচ্যয় ॥ মহাদেবোবাচ ॥ শৃনু প্রিয়ে মহেশানী যৎ পৃচ্ছসি সুশোভনং ।
তবাগ্রে কথয়িষ্যামি সাবধানে বধারয় ॥ গুরু সু আদিশ্য শিষ্যানাং প্রাক্ দিনে
ব্রত কাল্পিতে । পাগপাত্রং পাত্রিতজ্য গৃহাদি পবিত্র লেপনে ॥ শুদ্ধাচারী
১০ ভবেত্তেব স্নানান্তে গুরু সান্নিধৌ । নব্য বস্ত্রানি দ্রব্যাদি যথা শক্তি চ সুদ্রয়া ॥
গুরুরগ্রে নিবেদশ্চ যানি প্রাপ্যান্তি কায় যে । শুদ্ধচিত্তে শুচিভাবে করজোরে চ
দি হস্তু পস্কুতবাক্ষ্য ততঃ শান্তি চ দুর্ভিক্ষ
সন্নিধে ॥ পশ্চাৎ দণ্ডবতং কৃত্বা লম্ব মানে গুরু পদে । ~~সস্তু বাবে ... শান্তি~~
~~কুর্য্যাৎ গুরু প্রিয়~~ ॥ নর শাক্ষি দেবতাদিক তব্যো গুরুদেবতা । বোধয়েৎ তানি শাস্ত্রাদি

চতুর্দ্দশ সমান্বিতং ॥ যথা ॥ সূর্য্য শোমো যমঃ কাল মহাভুতানি পঞ্চবৈ । এতে শুভা
শুভস্যেহং কর্ম্মনো নব শাক্ষিনঃ ॥ আদিত্য চন্দ্রা অনিলো নলশ্চ দ্যৌ ভূমী
রাপো হৃদয়ং যমশ্চ অহশ্চ রাতৃচ উভেচ সন্ধ্যে ধর্ম্মস্য জানাতি নরস্য বৃত্তং ॥
ইত্যনেন নব দেবতা চতুর্দ্দশ দেবতাদি শাক্ষ্যনো কৃত্বান্তরে, শিষ্যোক্ত মন্ত্রাদৌ শিষ্য
মুখাৎ গুরুং পাযয়িত্বা বোধয়েৎ ॥ কৃষ্ণায় নমঃ, হররে নমঃ, গুরুবে নমঃ,
বৈষ্ণবায় নমঃ, শ্রীকৃষ্ণে শরণং শ্রীগুরুবে শরনং নামে শরনং বৈষ্ণবে শরণং
শ্রীকৃষ্ণং ভজামি, শ্রীগুরুং ভজামি, নামং ভজামি, বৈষ্ণবং ভজামি, হে কৃষ্ণ

তব পদরেণু অজ্ঞাত দোষে, অনাদি জন্মান্তরং, ভব সংসারে ভ্রমনং করিষ্যে,
তব ভক্তস্য, সৎসঙ্গং দেহি, তব নাম গুণাদি গীতানি, মম বদনে নিয়তং
রক্ষয়, সত্যে সত্যে সত্যে, কায় বাক্য মনেন, শ্রীকৃষ্ণস্য চরণে, শ্রীগুরুদেবে
১১ চরণে, শরণং লাভিষ্যে, শরণ শরণং, শরণ হরিং, শরণং লাভিষ্যে, দাস্যে তুল
সংবৃতে, শরণং লাভিষ্যে, নব দেবতাগ্রে, দেহ গেহ মম, যানি পারিবারাণি,
বিত্ত বিভুতি যানি, তানি সর্ব্বং, অভয় চরণে, রক্ষয় রক্ষয়, হে গুরুদেব
তব পদাম্বুজং সেব্যং, যানি কর্ম্মো অহং কৃতো, যানি কর্ম্মানি করিষ্যে, যানি কর্ম্মং

কাৰয়িষ্যামি, হে কৃষ্ণ গোবিন্দ, অদ্যাবধি, তব পাদপদ্মে, তৎ সৰ্ব্বং সমৰ্পয়িষ্যে
হে গুৰু গোবিন্দ, ইদানীং কৰুণাং কুৰু, ইদানীং উদ্ধাৰং কুৰু ।। এতানি মন্ত্ৰাণি
ত্ৰিবাৰং শিষ্যমুখাৎ পাঠয়িত্বা, বিশিষ্টৰূপেণ বোধয়েৎ । ততঃ শিষ্যোক্ত বচনাদি
বিশুদ্ধাদ্গুৰুৰ্বোধয়েৎ শিষ্যায় ।। ৭ ।। একাদশ্যামমাবস্যাং সংক্ৰান্ত্যাং পূৰ্ণিমা দিনে । গুৰ্ব্বাৰ্থে
পি চ শ্ৰাদ্ধে চ বৰ্জ্জয়েৎ হলবাহনং ।। গুৰ্ব্বাগ্ৰে নাবদেৎ মিথ্যাং শাঠ্যাদিভিঃ কথঞ্চন । অন্যস্থাপৰ
চৌৰ্য্যাদি জীবিকাৰ্থেপি বা মতঃ । তস্মাৎ সৰ্ব্ব প্ৰযত্নেন বৰ্জ্জনীয়া গুৰাগ্ৰত । উচ্চৈঃ বচনানি বাক্যানী-
নাচৰেৎ কদাচন । শুভা শপথং নাদায় গুৰুন্নামৈব কেবলম ।। মাতৃবৎ পৰদাৰেষু পৰদ্ৰব্যেষু

লোষ্ট্রবৎ। আত্মবৎ সর্ব্বভূতেষু যঃ পশ্যতি স পণ্ডিতঃ॥ উৎসবে ব্যসনে চৈব দুর্ভিক্ষে
শত্রুবিগ্রহে। রাজদ্বারে শ্মশানে চ যস্তিষ্ঠতি স বান্ধবঃ॥ শীষ্যাগ্রেণ গুরুং নিন্দা
শ্রুত্বা পিতা সুতশ্চ চ। দোষাশ্চ লভতে শিষ্যঃ শ্রুত্বা শ্রুতঃ কথয়েন॥ গুর্ব্বাজ্ঞাস্তু ভুক্তে শিষ্যান্
শুশ্রূষাচারাশ্চ বর্জ্জয়েৎ। গুর্ব্বার্থে ভাষিতং মিথ্যা মাদেযো শিষ্য সুতয়া॥ উচ্চ স্থানে চ
যানাদি পাদুকাং চ কথয়েন। ধ্ব বক্ষে পর মারঙ্কো ক্রোধাদ্ধ ভক্ষ্য শিষ্যয়া॥ অহিংসা পরমো
৭২ ধর্ম্মঃ সর্ব্ব শাস্ত্রে নিদর্শিতং। হিংসান্তি প্রলয়ং যান্তি ধর্ম্মে রক্ষতি সর্ব্বদা॥ একা গৌ পঞ্চ
ব্যাঘ্রেণ সপ্ত সিংহো শত সর্পকো। তত্র প্রস্থুতিকা জ্ঞেয়া ব্যাধিকাভ্যন্তরে পশুঃ॥ শতপুত্রো